National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 130-132
© 2025 NJHSR
www.sanskritarticle.com

**Srikanth K**
Research scholar
Department of Nyaya
National Sanskrit University
Tirupati

**Correspondence:**
**Srikanth K**
Research scholar
Department of Nyaya
National Sanskrit University
Tirupati

# व्याप्तिपञ्चकम्

**Srikanth K**

अनुमितिहेतुभूत व्याप्तिज्ञाने का व्याप्तिः। व्याप्तेः स्वरूपं किमिति जिज्ञासायां मणिकारैः उच्यते न तावदव्यभिचरितत्वमित्यादिना - नाम तैः उक्त पञ्चलक्षणान्यपि अव्यभिचरितत्वपदप्रतिपाद्यभिन्नानि इति। तदेवोक्तं माथुर्यां। नेति सर्वस्मिन्नेवलक्षणेसम्बन्ध्यतेति।

वक्ष्यमाणसाध्याभाववदवृत्तित्वादिरूप प्रत्येकलक्षणेष्वपि अव्यभिचरितत्व भेदः अस्तीति। तदर्थंपञ्च-विशेषाभावकूटानुमानमुपयुज्यते व्याप्तिः साध्याभाववदवृत्तित्वरूपाव्यभिचरितत्वशब्दप्रतिपाद्य स्वरूपा न केवलान्वयिन्यभावात् ।

व्याप्तिः साध्यवद्भिन्नसाध्याभाववदवृत्तित्वरूपाव्यभिचरितत्वशब्दप्रतिपाद्यस्वरूपा न केवलान्वयिनि अभावात्। व्याप्तिः साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यरूपाव्यभिचरितत्वशब्दप्रतिपाद्य-स्वरूपा न केवलान्वयिन्यभावात्। व्याप्तिः सकलसाध्याभववन्निष्ठाभावप्रतियोगिरूप अव्यभिचरित्व-शब्दप्रतिपाद्यस्वरूपा न केवलान्वयिन्यभावात्। व्याप्तिः साध्यवदन्यावृत्तित्वरूप अव्यभिचरित्वशब्द-प्रतिपाद्यस्वरूपा न केवलान्वयिन्यभावात्।

अतः व्याप्तिः अव्यभिचरित्वशब्द प्रतिपाद्यस्वरूपा न केवलान्वयिन्यभावादिति अनुमानम् फलति।

यतोहि पूर्वोक्त पञ्चविशेषाभाव कूटस्य सामान्याभाव हेतुता प्रसिद्धेन। तदनन्तरं एकैकं लक्षणं विस्तृत्य दूषयति तद्धित्यादिना साध्याभाववदवृत्तित्वमिति प्रथमम् लक्षणं।

तत्र साध्याभाववद्वृत्तित्वमितिव्यभिचारः।

तर्हि **अव्यभिचरितत्वं नाम साध्याभाववदवृत्तित्वमिति।**

वन्हिमान् धूमादित्यत्र साध्यं=वन्हिःसाध्याभावः=वन्ह्यभावः।

तद्वान्=जलह्रदादिः। तन्निरूपित वृत्तित्वं=मीनादौ वृत्तित्वाभावःधूमे इति लक्षणे समन्वयः।

धूमवान् वन्हेरित्यत्र नातिव्याप्तिश्च। साध्याभावः=धूमाभावः तद्वान् व्यभिचारनिरूपकाधिकरणं अयोगोलकमपितन्निरूपित वृत्तित्वमेव वन्हौ न तु वृत्तित्वाभाव इति नातिव्याप्तिश्च।

अस्मिन् लक्षणे कपिसंयोगी एतत्वृक्षत्वात् इत्यादौ अव्याप्तिः आशङ्किता। तत्र (अग्रेवृक्षःकपिसंयोगिमूले न) इतिप्रतीत्या कपिसंयोगाभाववत्मूलावच्छिन्न वृक्षः भवति तन्निरूपित वृत्तित्वमेव एतत्वृक्षत्वेतिअव्याप्तिः। एवञ्च इदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वाभाववतः अप्रसिद्ध्याव्याप्तिरिति।।

**साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमिति।** द्वितीयं लक्षणं। वन्हिमान् धूमादित्यादौ साध्यवत्महानसादिः। तद्भिन्नं ह्रदादिःतत्र विद्यमानः यःसाध्याभावःवन्ह्यभावःतद्वान् ह्दादिः तन्निरूपित वृत्तित्वं मीनादौ। वृत्तित्वाभावः धूमे इति लक्षणसमन्वयः। धूमवान्वन्हेः इत्यत्र नातिव्याप्तिश्च साध्यं धूमः तद्वत्पर्वतादिः

साध्यवद्भिन्नं अयोगोलकमपि तन्निरूपितवृत्तित्वमेव वन्हौ न तु वृत्तित्वाभाव इति नातिव्याप्तिः। तत्र कपिसंयोगी एतत् वृक्षत्वादित्यादित्याद्यव्याप्यवृत्ति साध्यकस्थले अव्याप्तिवारणाय साध्याभाववतो विशेषणमिति प्राञ्चः।अत्र कपिसंयोगात् एतत् वृक्षः तद्भिन्नं गुणादिःतन्निरूपितवृत्तित्वं गुणत्वादौवृत्तित्वाभावःएतत् वृक्षत्वे इति नाव्याप्तिः इति। एतदर्थमेव साध्यवद्भिन्ने साध्याभाववत विशेषणमिति प्राञ्चःइति।तदसतदिति कुत इति चेत् साध्यवद्भिन्ना-वृत्तित्वमिति लक्षणे साध्यवद्भिन्ने साध्याभाववतःअविशेषणत्वेऽपि कपिसंयोगवद्भिन्नं गुणादिः तन्निरूपितावृत्तित्वस्य एतद्वृक्षत्वे सत्वात् नाव्याप्तिः। परन्तु साध्याभाववतः वैय्यर्थ्यापत्तिः। इति नव्यास्तु सप्तमीतत्पुरुषसमासमङ्गीकृत्य साध्यवद्भिन्नसाध्याभावघटित अभाव-त्वस्य व्यर्थविशेषणत्वं वारयति।अन्यथा यथोक्त लक्षणे साध्यवद्भिन्नावृत्तित्वस्याप्रवेशात्। तादृश स्वरूपं तृतीय पञ्चम लक्षणान्तरेषु प्रतिपादितं।तत्पुरुषपक्षे तु वृत्यादि विशेषणतया साध्यवद्भिन्नस्य विशेषणात् न साध्याभावत्वांशस्य वैय्यर्थ्यापत्तिः इति।साध्यवद्भिन्नवृत्तीति साध्याभावस्य विशेषणत्वम् दातव्यम्। अन्यथा साध्याभाववदवृत्तित्वं इत्येव लक्षणमुच्यते चेत्। संयोगिद्रव्य-त्वादित्यादौ। संयोगाभाववद्द्रव्यादिषु द्रव्यत्वस्य विद्यमानत्वात् अव्याप्तिः।

अतः साध्यवद्भिन्नवृत्तीति। तर्हि द्रव्यत्ववद्भिन्नवृत्ति गुणादिषु द्रव्यत्वाभावस्य विद्यमानत्वात् नाव्याप्तिः साध्यवद्भिन्नवृत्तिः यः तद्वदवृत्तित्वमित्येवलक्षणं भवतु इति चेत्। संयोगवद्भिन्नगुणादौ विद्यमान प्रमेयत्ववद्वृत्तित्वस्यैव द्रव्यत्वे सत्वात् अव्याप्तिः। अभावे साध्यीयत्वानिवेशे वन्हिमान् धूमादित्यादावव्याप्तिः। साध्यवद्भिन्न जलह्रदादौ विद्यमान द्रव्यत्वाधिकरणत्वाभावाभावं गृह्यते।

तद्वत्महानसादिकमपि तन्निरूपित वृत्तित्वस्य धूमे सत्वादव्याप्तिः।

एवञ्च घटत्वघटाकाशसंयोगान्यतराभावाभावस्य अतिरिक्ततया तद्वान् न गगनं परन्तु अन्यदेव तन्निरूपितावृत्तित्वस्य गगनत्वे विद्यमानत्वात् नाव्याप्तिः।

अतःसाध्यवद्भिन्नवृत्तिसाध्याभाववदवृतित्वमित्येव। लक्षणं वक्तव्यम्।। कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह साध्यवदिति।**साध्य-वत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यमिति।** तृतीयं लक्षणं। अधिकरणभेदेनाभावभेदानभ्युपगन्तृमते इदं लक्षणं। तत्र वन्हिमान् धूमादित्यत्र साध्यं=वन्हिः साध्यवत्प्रतियोगिकः अन्योन्याभावः इत्युक्तो वन्हिमान्न इत्याकारकः भेदः तद्वान् जलादिः तन्निरूपित वृत्तित्वाभावः धूमे इति लक्षणसमन्वयः।धूमवान्वन्हेः इत्यत्र साध्यं =धूमः तत्प्रतियोगिकः अन्योन्याभावः धूमवान् न इत्याकारकः धूमवद्भेदः तद्वत् अयोगोलकमपि तन्निरूपितासामानाधिकरण्यं न वन्हाविति। नातिव्याप्तिः। अस्मिन् लक्षणे व्यासज्यवृत्तिधर्मावच्छिन्न प्रतियोगिताकभेदमादायाव्याप्तिः।साध्यवत्प्रतियोगिकान्योन्याभावासा मानाधिकरण्यमिति नाम वन्हिघटोभयप्रतियोगिकभेदः तद्वत्= महानसः तन्निरूपितवृत्तित्वमेव धूमे इति अव्याप्तिः। अतः प्रतियोग्यवृत्तित्वेन भेदः विशेषणीयः। तर्हि उभयभेदश्च प्रतियोगि-वृत्तीति सः न ग्राह्यः। एवमपि तत्तत्व्यक्तित्वावच्छिन्नाभावमादाय अव्याप्तिरिति। प्रतियोग्यवृत्ति साध्यवत्प्रतियोगिकान्योन्याभावः नाम महानसीयवन्हिम् तद्व्यक्तित्वेन गृहीत्वा तद्व्यक्तिर्नास्तीत्यभावः तद्वान् पर्वतः तन्निरूपितवृत्तित्वमेव धूमे न तु वृत्तित्वाभाव इति अव्याप्तिः। अतः प्रतियोग्यवृत्तित्वमपहाय भेदः साध्यवत्वावच्छिन्नप्रतियोगिता-कत्वेन विशेषणीया इति। तर्हि वक्ष्यमाणपञ्चमलक्षणाभेदः इति चेन्न यदि साध्यवत्प्रतियोगिकान्योन्याभावः निवेश्यते तर्हि केवलान्वयि-साध्यके अव्याप्तिः यथा नानाव्यक्तिसाध्यकेऽपि अव्याप्तिः स्यात्। केवलान्वयि यद्यपि तत्तत्व्यक्तित्वावच्छिन्न भेदः प्रसिद्ध्यति चेदपि नाम घटरूपवाच्यम् तद्व्यक्तित्वेन गृहीत्वा तद्व्यक्तिर्नास्तीति भेदः पटे इति। साध्याभावः अत्र प्रसिद्ध्यति चेदपि। तद्वति पटादौ ज्ञेयत्वस्य विद्यमानत्वात् अव्याप्तिः तादवस्थ्यमेव। यदि भेदः साध्यवत्वा-वच्छिन्नप्रतियोगिताकत्वेन निवेश्यते चेत् वन्हिमान् धूमादित्यादौ अव्याप्तिः न सम्भवति।

तर्हि पञ्चमलक्षणाभेदः दोषः इति चेन्न। तत्र पञ्चलक्षणे साध्यवत्त्वाच्छिन्नप्रतियोगिताकभेदवत्वेन प्रवेशः। अत्र तु साध्यवत्त्वा-च्छिन्नप्रतियोगिताकभेदाधिकरणत्वेननिवेशः इति अधिकरणप्रवेशा-प्रवेशाभ्यांभेदः उक्तः अतः न अभेदः दोषः अत्र संभवतीति।।

हेतोः=धूमस्य साध्यवत्पक्षःपर्वतः तद्भिन्न दृष्टान्तं भवति महानसः तन्निरूपितवृत्तित्वमेव धूमे इति अव्याप्तिः। अतः सकलसाध्याभव-वन्निष्ठाभावप्रतियोगित्वरूप चतुर्थलक्षणमारब्धं मणिकारैः।

तथा च **सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वमिति।** यावन्त-स्साध्याः=निखिल वन्हयः तदभावाधिकरणानियावन्ति=जलह्रदादिः तत्र विद्यमानः यः अभावः धूमाभावः तत्प्रतियोगित्वं च धूमे इति लक्षणसमन्वयः। धूमवान्वन्हेः इत्यत्र यावन्तः साध्याः=निखिल धूमाः तदभावाधिकरणयावदन्तर्गतं अयोगोलकमपि तत्रविद्यमानःयः अभावः = न वन्ह्यभावः अतः तत्प्रतियोगित्वं न वन्हाविति नातिव्याप्तिः।

साध्याभाववति साकल्यविशेषणानुपादाने धूमवान्वन्हेः इत्यत्र यावत् धूमाभावाधिकरणं यत्किञ्चिदित्यनेन ह्रदःगृह्यते तत्र विद्यमानः अभावः इत्युक्तौ वन्ह्यभावः तत्प्रतियोगित्वं वन्हाविति अतिव्याप्तिः।तत्र यावत् पददाने यावत्धूमाभावाधिकरणयावदन्तर्गतं अयोगोलकमपि तत्र वन्ह्यभावः न भवतीति नातिव्याप्तिः।

एवमपि द्रव्यं सत्वादित्यत्रातिव्याप्तिः द्रव्यत्वाभाववति गुणादौ विद्यमानः अभावः विशिष्टसत्ताभावः तत् प्रतियोगित्वस्य विशिष्टशुद्ध-योरनतिरेकात् शुद्धसत्तायामपि विद्यमानत्वात् अतिव्याप्तिः। अतः तादृशाभावप्रतियोगितावच्छेदकतायाः पर्याप्तिसंबन्धेनाधिकरणीभूतं यद्धेतुतावच्छेदकं तद्वत्वस्य विवक्षितत्वात्।द्रव्यं सत्वादित्यत्र तु विशिष्टसत्ताभावीय प्रतियोगितावच्छेदकन्तु गुणकर्मान्यत्ववैशिष्ट्य-सत्तात्वधर्मद्वयं तच्च न हेतुतावच्छेदके सत्तात्वे इति नातिव्याप्तिः। तत्र सकलसाध्याभावाधिकरणसकलाभावीयप्रतियोगिता हेतुतावच्छेदक-सम्बन्धावच्छिन्ना ग्राह्या। अन्यथा द्रव्यं सत्वादित्यत्र तादृशा भावाधिकरणे गुणादौ संयोगसम्बन्धेन सत्ताभावः तत्प्रतियोगित्वं अयं सत्तायां विद्यमानत्वात् अतिव्याप्तिः अत्र हेतुतावच्छेदकसम्बन्धेन स्वरूपसंबन्धः तेन संबन्धेन तादृशाभावश्च न गुणादाविति नातिव्याप्तिः। कपिसंयोगी एतत्वृक्षत्वात् इत्यत्र कपिसंयोगाभावस्य यावदधिकरणं एतत्वृक्षोऽपि।तत्र एतत्वृक्षत्वाभावः न भवतीति अव्याप्तिः। तद्वारणाय निरवच्छिन्नसाध्याभावाधिकरणता इत्युच्यते। तादृशसकलकपिसंयोगाभावाधिकरणता च गुणादावेव सत्वेन तत्र एतत्वृक्षत्वाभावस्य वर्तमानत्वात् नाव्याप्तिः। एवञ्च पृथिवी कपिसंयोगादितिव्यभिचारिणि अतिव्याप्तिवारणाय सकलसाध्या-भववन्निष्ठ निरवच्छिन्नाभाव प्रतियोगित्वमिति विवक्षणीयम्।यद्यपि कपिसंयोगाभावस्य केवलान्वयित्वात् पृथिवीत्वाभाववति जलाद-वप्यस्ति तथाऽपि सः निरवच्छिन्नेति नातिव्याप्तिः। द्रव्यत्वाभाववान् संयोगवद्भिन्नत्वादित्यत्र तु द्रव्यत्वाभावाभाववति द्रव्यं संयोग-वद्भिन्नत्वाभावः न भवतीति अव्याप्तिः। यतो हि संयोगवद्भिन्न-त्वाभावः संयोगात्मकः इति संयोस्य निरवच्छिन्नवृत्तित्वं न संभवतीति। अन्योन्याभावस्य व्याप्यवृत्तितानये अन्योन्याभावाभावस्य न प्रतियोगितावच्छेदकस्वरूपः किन्त्वतिरिक्तैवेत्यतः संयोगवद्भिन्न-त्वाभावः न संयोगात्मकः अतः तस्य निरवच्छिन्नवृत्तित्वं सिद्ध्यतीति। सकलशब्दस्य व्यापकत्वार्थकतया साध्याभावव्यापकीभूताभावप्रति-योगित्वं निष्कृष्टार्थः। यदि व्यापकत्वं तद्वन्निष्ठात्यन्ताभावप्रतियोगि-तानवच्छेद-कत्वं तर्हि द्रव्यं सत्वादित्यादौ द्रव्यत्वाभाववति गुणादौ यद्यपि सत्ताभावः न वर्तते तथाऽपि तत्र प्रमेयत्वस्य व्यापकत्वं गृहीत्वा तद्वत् सत्ताभावः इति तत्प्रतियोगित्वस्य सत्तायां विद्यमानत्वात् अतिव्याप्तिः। तद्वारणाय व्यापकत्वं तद्वन्निष्ठान्योन्याभावप्रतियोगि-तानवच्छेदकत्वं गृह्यते। तर्हि तदभाववति गुणादौ सत्ताभावभेदस्य वर्तमानत्वात् तत्प्रतियोगितावच्छेदकत्वमेव सत्ताभावत्वे इति नातिव्याप्तिः। तथापि निर्धूमत्वव्याप्याभावाधिकरणे पर्वतादौ निर्वन्हित्वभावभेदस्य विद्यमानत्वात् तत्प्रतियोगितानवच्छेदकत्वा-भाव न निर्वन्हित्वभावेति अव्याप्तिः। अतः तादृशाधिकरणताव्या-पकतावच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्ना यद्धर्मावच्छन्नाभावत्वं तर्द्धमवत्वस्य विवक्षितत्वात्। द्रव्यं सत्वादित्यत्र द्रव्यत्वाभाववति गुणादौ विद्यमानः अभावः सत्ताभावाभावः तत् प्रतियोगितावच्छेद-कत्वमेव सत्ताभावत्वे इति। सत्ताभावत्वस्य व्यापकतानवच्छेदकत्वात् नातिव्याप्तिः। निर्धूमत्वव्याप्यवान् निर्वन्हित्वादित्यत्र निर्धूमत्वव्या-प्याभावाधिकरणे पर्वतादौ निर्वन्हित्वाभावाभावः न भवति अपि तु घटाभावः तत्प्रतियोगितानवच्छेदकत्वस्य निर्वन्हित्वभावे सत्वात् तत्प्रतियोगित्वं निर्वन्हित्वेति नाव्याप्तिः।

**साध्यवदन्यावृत्तित्वमिति** पञ्चमलक्षणं वर्तते। वन्हिमान् धूमादित्यत्र साध्यं वन्हिः तद्वत् पर्वतादिः तदन्यः जलह्रदादिः तन्निरूपित वृत्तित्वं मीनादौ वृत्तित्वाभावः धूमे इति लक्षणसमन्वयः। धूमवान् वन्हेरित्यत्र साध्यं धूमःतद्वदन्यत् व्यभिचारनिरूपकाधिकरणं अयोगोलकं तन्नि-रूपित वृत्तित्वमेव वन्हाविति नातिव्याप्तिः। साध्यवदन्यावृत्तित्व-मित्यत्र हेतौ वृत्तित्वसामान्याभावः बोध्यः। तेन धूमवान् वन्हेरित्यत्र धूमवदन्यनिरूपितवृत्तित्व जलत्वोभयाभावस्य वन्हौ विद्यमानत्वेऽपि नातिव्याप्तिः तत्र साध्यवदन्येत्यत्र भेदः साध्यवत्वावच्छिन्नप्रति-योगिताको बोध्यः नञा तेन महानसीय वन्हिमद्भेदस्य पर्वतादौ धूमे सत्वेऽपि नाव्याप्तिः। न वा वन्हिमत्वावच्छिन्नप्रतियोगिताकात्यन्ता-भाव भेदवत् पर्वतादिः तन्निरूपितवृत्तित्वस्य धूमे सत्वादव्याप्तिः। तादृशाभावीयप्रतियोगितायाः अत्यन्ताभावत्वनिरूपित्वेन अन्योन्या-भावत्वनिरूपितत्वविरहात् नाव्याप्तिरिति। साध्यवत्वञ्च साध्यता-वच्छेदकसंबन्धेन बोध्यं। अन्यथा वन्हिमान् धूमादित्यत्र समवायेन वन्हिमत्वावच्छिन्नप्रतियोगिताकभेदाधिकरणं पर्वतः तन्निरूपित-वृत्तित्वमेव धूमे इति अव्याप्तिः। अत्र साध्यतावच्छेदकसम्बन्धः संयोगसम्बन्धः तेन सम्बन्धेन तादृशाभावाधिकरणं न पर्वतः परन्तु ह्रदादिः तन्निरूपित वृत्तित्वाभास्य धूमे सत्वात् नाव्याप्तिः।

तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्न साध्यनिष्ठावच्छेदकताक तादात्म्यसम्बन्धावच्छिन्न प्रतियोगिताकाभाववन्निरूपित हेतुता वच्छेदकसम्बन्धावच्छिन्नवृत्तित्वसामान्याभावः व्याप्तिरिति लक्षणं फलितम्।।